सेचनमार्द्रीकरणम्

ॐ इरितो धातोरङ्वा स्यात्परस्मैपदे अश्चुतत् अश्चोतीत् यका
ररहितोप्ययं श्चोतति चुश्चोत अश्चोतीत् अश्चुतत् अश्चोति
ष्यत् च्युतिर् आसेचने च्योतति टुनदि समृद्धौ आदिर्ञिटुडुवः
उपदेशे धातोराद्या एते इतः स्युः इदितो नुम् धातोः नंदति ननंद न
1 नंदिता नंदिष्यति नंदतु अनंदत् नंदेत् इतित्वान्नलोपो न नं
द्यात् अनंदीत् अनंदिष्यत् एवं कुथि पुथि लुथि मथि मंथ हिंसा
संक्लेशनयोः चिदि अवयवे भिदीति पाठांतरं गडि वदनैकदे
शे चादि आह्लादने णदि चेष्टायां कदि क्रदि क्लदि आह्वाने रो
दने च क्लिदि परिदेवने तकि कृच्छ्रजीवने पशिकुशिकु गिव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः प्रणि
नदति प्रणिनदति नदति ननाद अत एकहल्मध्येऽनादेशा
देर्लिटि लिण्निमित्तादेशादिकं न भवति यदंगं तदवय
वस्यासंयुक्तहल्मध्यस्थस्यात एत्वमभ्यासलोपश्च किति लि
टि नेदतुः नेदुः थलि च सेटि इड्वति थलि वा प्रागुक्तं स्यात्
नेदिथ नेदथुः नेद ननाद नेदिव नेदिम नदिता नदिष्य
ति नदतु अनदत् नदेत् नद्यात् अनादीत् अनदीत् अन
दिष्यत् टुनदि समृद्धौ इदितसंज्ञावाच्या प्सातति णपूर्वोऽस्व
यः पिठ्यते ऽभ्यासस्य हलादिशेषापवादः चुम्बोत इति वा
णपूर्वोऽस्वयः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौ॰ ६

यात् सन्यात् वदव्रजमतो व्रजति वव्राज व्रजिता व्रजिष्यति
व्रजतु अव्रजत् व्रजेत् व्रज्यात् वदव्रजहलंतस्यचः एषाम
चो वृद्धिः स्यात् सिचिपरस्मैषु अव्राजीत् अव्रजिष्यत् कटेव
र्षावरणयोः कटति चकाट कटिता कटिष्यति कटतु अक
टत् कटेत् कट्यात् ह्म्यंतक्षणश्वसजागृणिश्व्येदितां ह्मयां
२ तस्यंक्षणादेएर्यंतस्य श्वयतेरेदितश्च वृद्धिर्नेडादौ सिचि अकटी
त् अकटिष्यत् गुपू रक्षणे गुपूधूपविच्छिपणिपनिभ्य आ
यः स्वार्थे सनाद्यंता धातवः सनादयः क्रमेणिङ्तः प्रत्यया
अंते येषां ते धातुसंज्ञकाः सनक्यच्काम्यच्क्यङ्क्यषो याचार
क्विप्णिज्यङौ तथा यगाय ईयङ्णिङ्चेति द्वादशामी सनादयः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पुगंतेति गुणः ३

जैने मथिमंडने णिचिआघृणि मंथविलोडने मंथति मर्म
थ किलान्नलोपः मथ्यात् अर्चपूजायां अर्चति तस्मात्तु
दृद्धिहला दिहलोधातोदीघीभूतादचः परस्यनुद्रस्यात्
आनर्च आनर्चतुः अर्चिता अर्चिष्यति अर्चतु आर्च
त अर्चेत् अर्च्यात् अर्चीत आर्चिष्यत् एवंअर्हगतौयाचने
च अतिअदिवंदने वनसंभनसंभक्तौ वनति ववान नघ
सदद्धादिगुणानां सासेदेदेवैकारादीनांगुणणाद्धेनविहि
ये तौ तत्तस्यचएत्वाभावलोपौन ववनतुः सनति ससान से
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham
नतुः सनेत् यथिमाथा जनसनखनामात्वंवाथादौवृत्ति सा

कौं धर्यौ तैर्यौतिरुक्ष्णुशीस्नुनुक्षुश्विडीश्रिभिः वृङ्वृञ्भ्यांचविनैका
चोऽजंतेषुनिहितास्मृताः कांतेषुशक्लृएकः चांतेषुपचमुच
रिचवच्विच्सिचःषट् छांतेषुप्रछेकः जांतेषुत्यज्निज्
भज्भंजभुजभ्रस्जमस्जयजयुजरुजरंजविजिस्वंजसृ
जः पंचदशाः दांतेषुअद्क्षुद्खिद्छिद्तुद्नुद्पद्यभिद्वि
3 द्यविनदविंद्शदसदस्विद्यस्कंदहदः षोडशाः धांतेषुक्रु
धक्षुधबुध्यबंधयुधरुधराधव्यधशुधसाधसिध्यएकादश
नांतेषुमन्यहनौद्वौ पांतेषुआपक्षिपछुपतपतिपतृप्य
दृप्यलिपलुपवपशपस्वपसृपस्त्रयोदश भांतेषुयभ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सनाद्यंताधातवइत्यस्यानंतरं भूवादयइत्येवस्त्वयितुंयुक्तं
धातुलाह्लडादयः गोपायति आयादयआर्द्धधातुकेवा आर्ध
धातुकोपदेशेयदंतं तस्यातोलोपआर्धधातुके आमः आमः
परस्यलुक् कृञ्चानुप्रयुज्यतेलिटि आमंतात्लिट्परात्कृभ्व
स्तयोनुप्रयुज्यंते तेषांद्विलादि उरत अभ्यासऋतोत्प्रत्यये
वृद्धिः गोपायांचकार द्वित्वात्परत्वाद्यापिप्राप्ते द्विर्वचनेचि
द्वित्वनिमित्तेचिअचआदेशोन द्वित्वकर्तव्ये गोपायांचक्रतुः
गोपायांचक्रुः एकाचउपदेशेनुदात्तात् उपदेशेयोधातुरे
काचनुदात्तश्चततःपरस्यवलादेरार्धधातुकस्येट्न स्यादि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौ॰ पु॰ ष्यति गोप्स्यति गोपायतु अगोपायत् गोपायेत् गोपाय्यात्
गोप्यात् अगोपायीत् नेटि इडादौ सिचि हलंतलक्षणवृद्धि
र्न अगोपीत् अगोप्सीत् झलो झलि झलः परस्य सस्य लोपः स्या
त् झलि अगोप्तां अगोप्सुः अगोप्सीः अगोप्तं अगोप्त अगोप्सं
4 अगोप्स्व अगोप्स्म अगोपायिष्यत् अगोप्स्यत् क्षि क्षये क्षय
ति चिक्षाय चिक्षियतुः चिक्षियुः एकाच इति निषेधे प्राप्ते
कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि क्रादिभ्य एव लिट इडन स्यात्
अन्यस्माद् अनिटोऽपि स्यात् अचस्तास्वत्थल्यनिटो नित्यं उप
देशेऽजंतो यो धातुस्तासौ नित्यानिट् ततस्थल इण्न उपदेशे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सांतेयुकषत्विषतुषद्विष
वपुषपिषविद्शिषस्मि

रमलमह्वयः मांतेयुगमनमयमरमश्चत्वारः शांतेयुकुशादि एकादश
शादिसदहसामृशक्रमरिशलिशविशस्पृशोदश षांतेयुघस्व
सौ द्वौ हांतेयुदह दिह दुह नह मिह वह रुह लिह वहौ द्वौ च
नुदात्ताः हलंतेयु धातवत्र्यधिकंशतं गोपायांचकर्थ गोपा
यांचक्रथुः गोपायांचक्र गोपायांचकार गोपायांचकृव गोपा
यांचकृम गोपायांचकृम गोपायांबभूव गोपायामास जु
गोप जुगुपतुः जुगुपुः स्वरतिसूतिसूयतिधूञूदितोवा ॥
स्वरत्यादेरूदितश्चपरस्यवलादेरार्द्धधातुकस्येड्वा जुगोपि
पिथ जुगोप्थ गोपिता गोपायिता गोप्ता गोपायिष्यति गोपि

प

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्वैप्सीत् अद्वेप्स्यत् तप संतापे तपति तताप तेपतुः तेपिथ
ततप्थ तप्ता तप्स्यति तपतु अतपत् तपेत् तप्यात् अता
प्सीत् अताप्तां अतप्स्यत् निसस्तपतावनासेवने षः स्यात्
आसेवने पौनःपुन्ये ततोन्यस्मिन्विषये निष्टपति क्रमु पाद
विक्षेपे वा भ्राश भ्लाश भ्रमु क्रमु क्लमु त्रसि त्रुटि लषः एभ्यः श्य
5 न्वा कर्तरि सार्वधातुके परे श्यन् क्रमः परस्मैपदेषु क्रमे दीर्घः
परस्मैपदे शिति क्राम्यति क्रामति च क्राम अनुक्रमेरनात्म
नेपदनिमित्ते अन्नेवेट् क्रमिता क्रमिष्यति क्राम्यतु क्राम
तु अक्राम्यत अक्रामत क्राम्येत क्रामेत् क्रम्यात् अक्रमी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वतः उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थल इण्न ऋ
तो भारद्वाजस्य तासौ नित्यानिट् ऋदंतादेव थलो नेट् भारद्वा
जस्य मते तेनान्यस्मादेव अयमत्र संग्रहः अजंताकार
वान्वा यस्तास्यनिट् थलि वेडयं ऋदंत ईदृङ्नित्यानिट्
क्राद्यन्यो लिटि सेट् भवेत् चिक्षयिथ चिक्षेथ चिक्षियथुः
चिक्षिय चिक्षाय चिक्षय चिक्षियिव चिक्षियिम क्षेता क्षे
ष्यति क्षयतु अक्षयत् क्षयेत् अकृत्सार्वधातुकयोर्दीर्घः अ
जंतांगस्य दीर्घः स्याद्यादौ प्रत्यये न तु कृत्सार्वधातुकयोः क्षीयात्
सिचि वृद्धिः परस्मैपदेषु इगंतांगस्य वृद्धिः परस्मैपदे सिचि अ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौं आतोलोपइटिच अजाद्योरार्द्धधातुकयोः क्ङिदिटोः परयो
रातोलोपः पपतुः पपुः पपिथ पपाथ पपथुः पप पपौ पपिव
पपिम पाता पास्यति पिबतु अपिबत् पिबेत् एर्लिङि घुसंज्ञा
नांमास्थागापिबतिजहातिस्यतीनांच एत्वमार्द्धधातुके लिङि कि
ल्डिति पेयात् गातिस्थेतिसिचोलुक् अपात् अपातां आतःसिजे
लुकि आदंतादेवकेजुस उस्यपदांतात् अपदांतादाकारादुसि
6 पररूपमेकादेशः अपुः अपास्यत् ग्लै म्लै हर्षक्षये ग्लायति
आदेच्चउपदेशेशिति उपदेशेएजंतस्यधातोरात्वंनतुशिति ज
ग्लौ ग्लाता ग्लास्यति ग्लायतु अग्लायत् ग्लायेत् ग्लायात्
वान्यस्यसंयोगादेः घुमास्यादेरं
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham
न्यस्यसंयोगादेर्धातोरात्वस्यएत्वंवा
आर्द्धधातुके किति ग्लेयात्

त् अक्रमिष्यत् चमु छमु जमु झमु अदने ष्ठिवुक्लमुचमांशि
ति अचोदीर्घः आङि चमो दीर्घ इति वक्तव्यं आचामति आङि
किं चमति विचमति अचमीत् स्खल संचलने स्खलति
चस्खाल अतो लांतस्य अतः समीपौ यौ लौ तदंतस्यांगस्यातो
वृद्धिः परस्मैपदे परे सिचि अस्खालीत् त्सर छद्मगतौ अत्सा
रीत् पा पाने पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिब
जिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः पादीनां पिबाद
यः स्युः शिति परे पादेः पिबादेशो ऽदंतः तेन न गुणः पिब
ति [illegible] पिबतु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Shareda Peetham

कौ॰ ५३
घातयोः स्त्यायति क्षोपदेशत्वाध्यि सत्वेकृते रूपंतुल्यं क्षोपदेशफलं तु तिष्ठासस्तीत्यादौ भविष्यति रै दरवदने ष्ठैजै मैक्षये सायति घु मास्थेत्यत्र विभाषाघ्राधेड्डित्यत्र चस्यते रेवग्रहणं न त्वस्यतेन एत सिच्लुकौन सायात् असासीत् कैगैरैशब्दे शैश्रैपाके पैडोवैशो षणे पायात् अपासीत् घुमास्थेतीत्वं तदपवादएलिङीत्येत्वं गा तिस्थेति सिच्लुक्चन लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्र हणमिति परिभाषया लाक्षणिकत्वात् ष्टैवेष्टने स्तायति ष्णैवेष्ट ने शोभायांचेत्येके स्नायति दैपशोधने दायति अघुत्वादेत्वसि च्लुकौन दायात् अदासीत् घ्रागंधोपादाने जिघ्रति घ्रायात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यमरमनमातांसक् च एषांसगेभ्यःसिच इट्परस्मैपदेषु अग्लासी
त् अग्लासिष्टां अग्लासिषुः अग्लास्यत् एवं म्लायतीत्यादि धे
ट् पाने धयति दाधाघ्वदाप् दारूपधारूपाधातवोघुसंज्ञाःस्यु
र्दाप्दैपौविना दधौ धेयात् विभाषाधेट्श्व्योः आभ्यांच्लेश्चङ्
स चङि अनभ्यासस्यधातोरवयवस्यप्रथमस्यैकाचोद्वेस्तोऽजादेर्द्विती
यस्य अदधत् अदधतां विभाषाघ्राधेट्शाच्छासः एभ्यःसि
चोलुग्वापरस्मैपदे अधात् अधातां अधुः पक्षे इट्सकौ अ
धासीत् अधासिष्टां धेन्वकारो धायति ध्यैत्वमे ध्यायति ध्रैतृ
प्तौ ध्रायति ध्यैचिन्तायां ध्यायति रैशब्दे रायति स्त्यैष्ट्यैसं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौं
पर्ध

ह्वरिष्यति ह्वरतु अह्वरत् गुणोर्तिसंयोगाद्योः ऋतेः संयोगादेर्ऋदं
तस्य च गुणो यक्रियाद्यार्द्धधातुके लिङि च ह्वर्यात अह्वार्षीत् अ
ह्वरिष्यत् स्वृ शब्दोपतापयोः स्वरति स्वरतीति वेट् सस्वरिथ स
स्वर्थ वमयोस्तुल्यरत्वादि विकल्पं बाधित्वा पुरस्तात्प्रतिषेधकांडा
रंभसामर्थ्यात् स्रुकः कितीति निषेधे प्राप्ते क्रादिनियमान्नित्यमि
४ ट् सस्वरिव सस्वरिम परत्वाहृद्धनो रितनित्यामिट् स्वरिष्यति
स्मृ चिंतायां स्मरति ह्वृ संवरणे ह्वरति स्रु गतौ क्रादित्वान्नेट् स
सर्थ सस्रव रिङ् शयग्लिङ्क्षु शयक्रियाद्यार्द्धधातुके लिङि
च ऋतो रिङ् रीङि प्रकृतौ ति रिङ्घि सामर्थ्यान्न दीर्घः स्रियात अ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

घ्रेयात् अघ्रासीत् अघ्रात् ध्मा शब्दाग्निसंयोगयोः धमति द
ध्मौ ष्ठा गतिनिवृत्तौ तिष्ठति स्यादित्येवं अधितष्ठौ उप
सर्गादित्येवं अधिष्ठाता स्थेयात् ससे कृते अकृतिस्तवर्गःस्या
त् उष्णांच नकारजावनुस्वारपंचमौ झलि धातुषु सकारजः श
कारश्चेर्वोहृवर्गस्तवर्गजः स्निर्थोलुक् अस्थात् म्ना अभ्यासे म
नति दाण् दाने प्रणियच्छति हृ कौटिल्ये ह्वरति ऋतश्च संयो
गादेर्गुणः ऋदंतस्य संयोगादेरंगस्य गुणो लिटि उपधावृद्धिः ज
ह्वार जह्वरतुः जह्वरुः जह्वर्थ जह्वरथुः ण्जह्वर जह्वार जह्वर
जह्वरिव जह्वरिम ह्वर्यौ ऋद्धनोः स्ये ऋतो हंतेः स्यस्य इट्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शृण्वन्ति शृणोषि शृणुथः शृणुथ शृणोमि लोपश्चास्यान्य
तरस्यां म्वोः असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा म्वोः परयोः
शृण्वः शृणुवः शृण्मः शृणुमः शुश्राव शुश्रुवतुः शुश्रुवुः
शुश्रोथ शुश्रुवथुः शुश्रुव शुश्राव शुश्रुव शुश्रुम श्रोता श्रो
७ ष्यति शृणोतु शृणुतात् शृणुतां शृण्वन्तु उतश्च प्रत्ययादसं
योगपूर्वात् असंयोगपूर्वात्प्रत्ययोतो हेर्लुक् शृणु शृणुतात् शृ
णुतं शृणुत शृणवानि शृणवाव शृणवाम अशृणोत् शृणु
यात् शृणुतो शृणुयुः शृणुयाः शृणुयातं शृणुयात शृणुयां शृ
णुयाव शृणुयाम श्रूयात् अश्रौषीत् अश्रोष्यत् गम्लृ सृप्लृ गतौ
इषुगमियमां छः शिति गच्छति जगाम गमहनजनखनघसां लो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सार्षीत् शीघ्रगतौ तु पाघ्रेति शिति धावादेशः धावति मधुसेचने
धृञ्छीने दृशिर्प्रेक्षणे पश्यति विभाषा सृजिदृशोः आमंच
लब्धा सृजिदृशोर्झल्यमकिति अनयोरमागमः स्याज्झलादा
वकिति दद्रष्ट ददर्शिथ पक्षेऽकःसि द्रक्ष्यति दृश्यात् इरि
त्वादङ्वा ऋदृशोऽङि गुणः अदर्शत् अङभावे दृशः ष्ठेवेत्य न
मागमः क्सेन अद्राक्षीत् अद्रक्ष्यत् श्रु श्रवणे श्रुवः शृ श्नु
वः श्नादेशः श्नुप्रत्ययश्चकर्तरि सार्वधातुके शृणोति सार्वधातुक
मपित् ङिद्वत् स्यात् शृणुतः हुश्नुवोः सार्वधातुके हुश्नुवोर
नेकाचोऽसंयोगपूर्वो वर्णो यणापद्यते सार्वधातुके

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौं पद

दधातेः ययंथ ययच्छ णमु प्रह्वत्वे शब्दे च नेमिथ ननंथ नंता
अनंसीत् अनंसिष्टां त्यज हानौ त्यजति तत्यजिथ तत्यक्
थ त्यक्ता अत्याक्षीत् अशू व्याप्तौ अशोऽन्यतरस्यां श्नुः स्यात्
कर्तरि सार्वधातुके परस्मैपदे अश्नोति अशति आनश आन
10 शिथ आनष्ठ अशिता अष्टा अशिष्यति स्कोरिति कलोपः व
ढोः कसि अक्ष्यति अश्नोतु अश्नुहि अश्नवानि आश्नोत्
आश्नुतां अश्नुयात् अश्नुयुः अश्यात् आशीत् आशिष्टां
अष्टां तक्ष त्वक्ष तनूकरणे तक्षः श्नुर्वा स्याच्छन्दोविषये तक्ष्णो
ति तक्षति वाकाष्टम् ततक्षिथ ततष्ठ अतक्षीत् अतक्षिष्टां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ग पः क्ङित्यनङि एषामुपधाया लोपोऽजादौ क्ङिति नत्वङि जग्मतुः ज
ग्मुः जगमिथ जगंथ जग्मथुः जग्म जगाम जग्मिव जग्मि
म गमेरिट् परस्मैपदेषु गमेः सादेरार्द्धधातुकस्येट् परस्मैपदेषु ग
मिष्यति गच्छतु अगच्छत् गच्छेत् गम्यात् पुषादिद्युताद्लृदितः
परस्मैपदेषु श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ्
अगमत् परस्मैपदेषु अगमिष्यत् सृप्लृ गतौ अनुदात्तस्य चर्दुपधस्यान्यतर
स्याम् उपदेशेऽनुदात्तो यऋदुपधस्तस्य अम्वा झलादावकिति स्र
प्ता सर्प्ता अस्रपत् ञिक्ष्विदा अव्यक्ते शब्दे क्ष्वेदति यभ मैथुने।
यभति येभिथ [illegible] नतु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौ० ५१ वति पिपीव मुर्वी बंधने उपधायां च धातोरुपधाभूतयो रेफवका
रयोर्हल्परयोः परतः इको दीर्घः मूर्वति मुमूर्व पुर्वपर्वमर्वपूरणे
पूर्वति पर्वति चर्व अदने कषखषशिषजषझषशषवषमष
मरुषरिषहिंसार्थाः शेषति शिशेष शलइगुपधादनिटः क्सः
११ इगुपधो यः शलंतस्तस्मादनिटः च्लेः क्सादेशः अशिक्षत तीष
सहलुभरुषरिषः इच्छत्यादेः परस्य तादेरार्द्धधातुकस्येड्वा रोषि
ता रोष्टा रेषिता रेष्टा भषभर्त्सने इह भर्त्सनं श्वरवः पुषपुष्टौ
पोषिता अनुदात्तेषु पुष्यतेः श्यना निर्देशादयमुदात्तः श्रिवु
धौ दैवादिकस्य ग्रहणान्नाङ् अपोषीत् श्रिवुश्लिषुप्रुषुप्लुषु

CC-0, Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

म तनूकरोति किम् नाभिः संतक्ष्णोति भर्त्सयतीत्यर्थः रक्षयात्मने र
क्षति णिक्ष चुंबने अणिक्षति वक्ष रोषे संघातेऽन्येके वक्षति मृ
क्ष विक्ष क्षिसंघाते मक्ष इत्येके तक्ष त्वचने त्वचनं संवरणं त्वचो ग्र
हणं च पक्ष परिग्रहे इत्येके सूर्क्ष आदरे सूर्क्षति काक्षि वाक्षि मा
क्षि कांक्षायां द्राक्षि ध्राक्षि ध्वाक्षि घोरवासिते च चूष पाने तूष तुष्टौ
पूष वृद्धौ मूष स्तेये लूष रूष भूषायां शूष प्रसवे यूष हिंसायां
जूष च भूष अलंकारे जि जये जयति सन्लिटोर्जेः सन्लिटोर्निमित्ता
दभ्यासात्परस्य जेः कुत्वं जिगाय जिग्यतु जिग्युः जिगयिथ जि
जेथ जीव प्राणधारणे जीवति पीव मीव तीव नीव स्थौल्ये पी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौं पटे ज्ञापकंतङादेशानांटेरेत्वंनेति तेनडारौरस्यन एधांचक्राते एच
क्रिरे एधांचकृषे एधांचक्राथे इणः षीध्वंलुङ्लिटांधोंगात्
इणंतादंगात्परेषांषीध्वंलुङ्लिटांधस्यढः एधांचकृढ्वे एधांच
क्रे एधांचकृवहे एधांचकृमहे एधांबभूव एधामास अनुप्र
48 योगसामर्थ्यादस्तेर्भूभावोन अन्यथाहि कस्यचानुप्रयुज्यतेइ
तिकृभ्वस्तिवाब्रूयात् एधिता एधितारौ एधितारः एधितासे ए
धितासाथे धिच धातोःप्रत्ययेसलोपः एधिताध्वे हएति तास
स्त्योः सस्यहःस्यादेतिपरे एधिताहे एधितास्वहे एधितास्महे
एधिष्यते एधिष्येते एधिष्यन्ते एधिष्यसे एधिष्येथे एधिष्य
ध्वे एधिष्ये एधिष्यावहे एधिष्यामहे आमेतः लोटः एधतां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दाहे श्रेषति श्लेषति प्रोषति प्लोषति शलहुलपत्लृ गतौ शलति
शशाल होलति जुहोल पतति पपात पतःपुम् अङि अप
प्तत् त्यन्यः इति परस्मैपदप्रक्रिया एध वृद्धौ टित आत्म
नेपदानां टेरे टितो लस्यात्मनेपदानां टेरेत्वं एधते आतो ङितः ए
अतः परस्य ङितामातः इय् एधेते एधन्ते थासः से टितो लस्य ए
धसे एधेथे एधध्वे एधे एधावहे एधामहे इजादेश्च गुरुम
तोऽनृच्छः इजादिर्यो धातुर्गुरुमान् अनृच्छत्यन्यस्तत आम् लिटि आ
मः प्रत्ययवत्कृञोऽनुप्रयोगस्य आम्प्रकृत्या तुल्यमनुप्रयुज्य
मानात् कृञोऽप्यात्मनेपदं लिङ्लृटोरेवकारः ... णां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौं पर्व धनतः अनकात्यस्यात्मनेपदेषु जस्यात्स्यात ऐधिषत ऐधिष्ठाः
ऐधिषाथां ऐधिढ्वं ऐधिषि ऐधिष्वहि ऐधिष्महि ऐधिष्यत
ऐधिष्येतां ऐधिष्यंत ऐधिष्यथाः ऐधिष्येथां ऐधिष्यध्वं ऐधिष्ये ऐ
धिष्यावहि ऐधिष्यामहि कमुकांतौ कमेर्णिङ् स्वार्थः अतउ
13 पधायाइतिवृद्धिः कामयते अयामंताल्वाय्येत्निष्णुषु एषुणेरय अयामन्त
कामयांचक्रे कामयांबभूव कामयामास आयादयइतिवा चक न्त्रालु
मे चकमाते चकमिरे चकमिषे चकमाथे चकमिढ्वे चकमे आय्यइत्नु
चकमिवहे चकमिमहे कामयितासे कमितासे कामयिष्यते इष्णुः५
कमिष्यते कामयतां अकामयत कामयेत कामयिषीष्ट णि
श्रिद्रुस्रुभ्यः कर्तरि चङ् एवंता टि[illegible]ङ् कर्तर्येलुङि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एधेतां एधंतां सवाभ्यांवामौ सवाभ्यांमस्यलोडेतः क्रमात्वामौ
स्तः एधस्व एधेथां एधध्वं एतऐ लोडुत्तमस्य एधै एधावहै ए
धामहै आटश्च ऐधत ऐधेतां ऐधंत ऐधथाः ऐधेथां ऐधध्वं ऐ
धे ऐधावहि ऐधामहि लिङःसीयुट् सलोपः लिङःसलोपोनं
त्यस्येतिसलोपः एधेत एधेयातां झस्यरन् लिङः एधेरन् एधे
थाः एधेयाथां एधेध्वं इटोऽत् लिङादेशस्य एधेय एधेवहि ए
धेमहि सुट्तिथोः लिङःसतथोः सुट् यलोपः एधिषीष्ट एधि
षीयास्तां एधिषीरन् एधिषीष्ठाः एधिषीयास्थां एधिषीढ्वं एधि
षीय एधिषीवहि एधिषीमहि ऐधिष्ट ऐधिषातां आत्मनेपदे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौ° मांतस्य धातोर्मस्य नम्वोः परतः चद्दणूवहे चद्दणूमहे गाधृप्र
६ तिष्ठालिप्सयोर्ग्रंथे च गाधते बाधृ लोडने लोडनं प्रतीघातः
बाधते नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु आशिषि नाथ इति वा
च्यं अस्याशिष्येवात्मनेपदं स्यात् नाथते अन्यत्र नाथति ना
24 धते दध धारणे दधते देधे स्कुदि आप्रवणे आप्रवणमुत्प्लु
वनमुद्धरणं च स्कुंदते चस्कुंदे श्विदि श्वैत्ये श्विंदते शिश्विंदे
वदि अभिवादनस्तुत्योः वंदते ववंदे भदि कल्याणे सुखे
च भंदते मदि स्तुतिमोदमदस्वप्नकांतिगतिषु मंदते स्पंदि
किंचिच्चलने मुद हर्षे मोदते मुमुदे [illegible] क्रीडायां च ऊ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कामि अ लुङ् इति स्थिते णेरनिटि अनिडादावार्द्धधातुके परे
णेर्लोपः णौ चङ्युपधाया ह्रस्वः चङ् परे णौ यदंगं तस्योपधाया ह्र
स्वः चङीति द्वित्वं सन्वल्लघुनि चङ् परेऽनग्लोपे चङ् परे णौ
यदंगं तस्य यो अभ्यासो लघु परस्तस्य सनीव कार्यं स्यात् णावग्लो
पे सति सन्यतः अभ्यासस्यात इत्वं दीर्घो लघोः लघोरभ्यास
स्य दीर्घः सन्वद्भावविषये अचीकमत णिङ् भाव पक्षे कमेश्च
अङ् वाच्यः णेरभावान्न दीर्घः सन्वद्भावो अचकमत अकामयि
ष्यत अकमिष्यत भाम क्रोधे भामते बभामे क्षमूष सहने णे
रभावान्न क्षमते चक्षमे चक्षमिषे चक्षंसे चक्षमिवहे म्वोश्च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौ० १२ किटेकृ गौ हृघ स्ववस्कमस्कटिक्रटीकृतिकृपी कृरघिलघि
त्यर्थाः कंकते चकंके वंकते श्वंकते त्रंकते दूौकंते इदौके त्रौ
कते तुत्रौके सु वु तुवि चुष्वकु तीनांसत्वनिषेधोवक्तव्यः स्वष्क
ते पस्वके वस्कते. मस्कते टेकते टीकते तेकते तीकते रं
घते लंघते श्लाघृकत्थने श्लाघते पश्लाघे पर्यौल्यक्तीकरणे पं
चते ऋजगतिस्थानार्जनोपार्जनेषु अर्जते नुट्विधौऋकारैक
देशोरेफोहलत्वेनगृह्यते नद्विहलत्वान्नुट् आनृजे ऋजांचक्रे
ऋजि भृजीभर्जने अंर्जते भर्जते एजृ भ्रेजृ भ्राजृदीप्तौ एजते
एजांचक्रे भ्रेजते विभ्रेजे भ्राजते वेष्टवेष्टने वेष्टते विवेष्टे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्दते ऊर्दीमाने कूर्दखूर्दगूर्दगुदक्रीडायामेव कूर्दते खूर्दते गू
र्दे गोदते जुगुदे षूदक्षरणे सुषूदे ह्रादअव्यक्तेशब्दे ह्रादते ज
ह्रादे ह्लादीसुखेच ह्लादतेजह्लादे ह्लादने स्वादआस्वादने॥
स्वादते सस्वादे पर्दकुत्सितेशब्दे गुदरवेत्यर्थः पर्दते यतीप्रय
त्ने यतते येते श्रथिशैथिल्ये श्रन्थते ग्रथिकौटिल्ये ग्रन्थते कत्थ
श्लाघायां कत्थते चकत्थे श्लोकते श्लोकृसंघाते संघातोग्रन्थः सचे
ह ग्रथ्यमानस्यव्यापारोग्रन्थितुबी श्लोके इकमेकोद्वितीयःसकर्मकः
श्लोकते शुश्लोके ह्रस्वः एच इग्घ्रस्वादेशे शकिशंकायां शंक
ते शशंके अकिलक्षणे अंकते आनंके ककिवकिश्वकित्र
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वात् प्रकारवचने जातीयर् महाप्रकारो महाजातीयः द्व्यष्टनः सं
ख्यायामबहुव्रीह्यशीत्योः आत्स्यात् द्वादश अष्टादश अबहुव्री
ह्यशीत्योः किम् द्विदशा द्व्यशीतिः प्राक्शतादूर्ध्वम् नेह द्विश
तं त्रेस्त्रयः त्रिशब्दस्य त्रयस्स्यात् पूर्वविषये त्रयोदश त्रयोविंश
तिः विभाषा चत्वारिंशत् प्रभृतौ सर्वेषां द्व्यष्टनो त्रेश्च प्रागुक्तं वा च
त्वारिंशदादौ परे द्विचत्वारिंशत् द्वाचत्वारिंशत् त्रिचत्वारिंशत्
त्रयश्चत्वारिंशत् एवं पंचाशत् षष्टि सप्तति नवतिषु परवल्लिंगं द्व
न्द्वतत्पुरुषयोः कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमौ अर्द्धपि
प्पली द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु न पंचकपालः पुरोडा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्योऽस्मइत्यर्थः ग्रामकौटाभ्यां च तक्ष्णः ग्रामतक्षः कौटतक्षः अतेः
शुनः अतिश्वो वराहः उपमानादप्राणिषु अप्राणिविषयकोपमान
वाचिनः शुनष्टच् आकर्षः श्वेव आकर्षश्वः उत्तरमृगपूर्वाच्च स
क्थ्नः चादुपमानात् उत्तरसक्थं मृगसक्थं पूर्वसक्थं फलकमिव सक्थि
फलकसक्थं नावो द्विगोः द्विनावं अर्द्धाच्च अर्द्धनावं क्लीवत्वं लोका
त् खार्याः प्राचां द्विगोरर्द्धाच्च खार्याष्टज्वा द्विखारं द्विखारि अर्द्धखा
रं अर्द्धखारि द्वित्रिभ्यामञ्जलेः द्व्यञ्जलं द्व्यञ्जलि ब्रह्मणो जानपद
ख्यायाम् ब्रह्मान्तात्तत्पुरुषाट्टच् सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः कुमह
द्भ्यामन्यतरस्याम् कुब्रह्मा कुब्रह्मः महाब्रह्मा महाब्रह्मः आन्महतः

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

कौं
५४

बोनपुंसकं स्यात् इनसभं पर्यायस्यैवेष्यते नेह राजसभा अमनुष्य
पाद्दोनूढा रक्षः पिशाचादीनाह रक्षसभं पिशाचसभम् विभाषा
सेनासुराच्छायाशालानिशानां एतदंतस्तत्पुरुषः क्लीवं वा ब्राह्मण
सेनं ब्राह्मणसेना इत्यादि अशाला च संघातार्थीया सभा तदंतस्तत्पु
27 रुषः क्लीवं स्यात् स्त्रीसभं स्त्रीसंघात इत्यर्थः अशाला किं धर्म
सभा धर्मशाला इत्यर्थः यवसुरं यवसुरा कुड्यच्छाया गोशालं
गोशाला श्वनिशं श्वनिशा अर्द्धर्चाः पुंसि च अर्द्धर्चादयः पुंसि क्ली
वे च स्युः अर्द्धर्चः अर्द्धर्चं एवं ध्वजतीर्थशरीरमंडपयूपदेहांकुश
कलशास्त्रपात्रादयः सामान्येनपुंसके मृदु पचति प्रातः कम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णः प्राप्तोजीविको प्राप्तजीविकः अश्ववडवाने पन्नजीवकः अ
लंकुमार्यैः अलंकुमारिः अतएवज्ञापकात्समासः निष्कौशां
बिः पूर्ववदश्ववडवौ द्विलमतंत्र अश्ववडवौ अश्ववडवान
अपथंनपुंसकम् तत्पुरुषइत्येव अन्यत्रतु अपथोदेशः कृत
समासांतग्रहणान्नेह अयंथाः अकारांतोत्तरपदोद्विगुः स्त्रियामि
ष्टः पंचमूली आबंतोवा पंचखट्व पंचखट्वी पात्राद्यंतस्यन पं
चपात्रं त्रिभुवनं चतुर्युगं छायावाहुल्ये छायांतस्तत्पुरुषोन
पुंसकंस्यात पूर्वपदार्थवाहुल्ये इक्षूणांछाया इक्षुछायं सभा
राजामनुष्यपूर्वा राजसदीयपर्याचं मनुष्यपूर्वान्तमांततात्पुरु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कौं पं प्रोदकोग्रामः ऊढरथोनड्वान उपहृतपशूरुद्रः उद्धृतौदनास्था
ली पीतांबरोहरिः वीरपुरुषोग्रामः प्रादिभ्योधातुजस्यवाच्योवा
चोत्तरपदलोपः प्रपतितपर्णः प्रपर्णः नञोस्त्यर्थानांवाच्योवा
४० चोत्तरपदलोपः अविद्यमानपुत्रो अपुत्रः स्त्रियापुंवद्भाषितपुं
स्कादनूङ्समानाधिकरणेस्त्रियामपूरणीप्रियादिषु उक्तपुं
स्कात्परऊङ्ऽभावोयत्रतथाभूतस्यस्त्रीवाचकपदस्यपुंवाचक
ना स्येवरूपंस्यात् समानाधिकरणेनतुपूरण्यांप्रियादिषुचपरतः गोस्त्रियोरि
तिह्रस्वः चित्रगुः रूपवद्भार्यः अनूङ्किम् वामोरूभार्यः॥
पूरणींत अप्पूरणीप्रमाणः पूरणार्थैप्रत्ययांतंयस्त्रीलिंगं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarayu Trust / Sharada Peetham

नीयं इति तत्पुरुषः शेषो बहुव्रीहिः अधिकारोयं प्राग्द्वंद्वात्
अनेकमन्यपदार्थे अनेकं प्रथमांतमन्यपदार्थे वर्त्तमानं वा सम
स्यते बहुव्रीहिः सप्तमीविशेषणे बहुव्रीहौ सप्तम्यंतं विशेषणं च
बहुव्रीहौ पूर्वं स्यात् हलदंतात्सप्तम्याः संज्ञायां हलंतादंताच्च
सप्तम्या अलुक् त्वचिसारः युधिष्ठिरः वनेकसेरुकः अरण्ये
तिलकः अमूर्द्धमस्तकात्स्वांगादकामे मूर्द्धमस्तकभिन्नाद्धलंता
दंताच्च सप्तम्या अलुक् कामभिन्ने उत्तरपदे उरसिलोमा कंठेका
लः अकामे किम् मुखकामः अमूर्द्धमस्तकात् किम् मूर्द्धशिखः
अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः प्राप्तलकं यं प्रा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham